# ॥ प्रतिकूलस्वानुकूलीकरणस्तोत्रम् ॥

श्रीभूपे कूपे सुखवारां कृतचित्तं
चित्ते त्वां ध्यायामि च भूयोऽहममत्तः ।
स्वामिन् भूमन् भो गुरुराज प्रतिकूलं
दारापत्याद्यं सकलं कुर्वनुकूलम् ॥ १ ॥

राष्ट्रे राष्ट्रे ख्यातयशस्तोम विभासिन्
वासिन् ध्यातुश्चेतसि दातः करुणावन् ।
स्वामिन् भूमन् भो गुरुराज प्रतिकूलं
दारापत्याद्यं सकलं कुर्वनुकूलम् ॥ २ ॥

घोरे संसारे पतितोऽहं तव पुत्रः
कुत्रावेयं त्वामपहाय प्रभुमिष्टम् ।
स्वामिन् भूमन् भो गुरुराज प्रतिकूलं
दारापत्याद्यं सकलं कुर्वनुकूलम् ॥ ३ ॥

वेदाहं नो सद्गतिहेतुं तव पोतः
पोतं पादादन्यद् ऋते संसृतिवार्धेः ।
स्वामिन् भूमन् भो गुरुराज प्रतिकूलं
दारापत्याद्यं सकलं कुर्वनुकूलम् ॥ ४ ॥

द्रावं द्रावं नश्यति कष्टं तव दृष्ट्यां
कष्ट्यापं त्वातः कुरु तुष्टं वृषपुष्टम् ।
स्वामिन् भूमन् भो गुरुराज प्रतिकूलं
दारापत्याद्यं सकलं कुर्वनुकूलम् ॥ ५ ॥

यत्यत्युच्च त्वत्पदरेणुं गतमानौ–
दार्यं धार्यं मूर्धनि वार्यन्नदमीडे ।
स्वामिन् भूमन् भो गुरुराज प्रतिकूलं
दारापत्याद्यं सकलं कुर्वनुकूलम् ॥ ६ ॥

नाना नाना दैवकदंबे सविलंबे
लंबे स्मालंबं सुखदं त्वामविलंबम् ।
स्वामिन् भूमन् भो गुरुराज प्रतिकूलं
दारापत्याद्यं सकलं कुर्वनुकूलम् ॥ ७ ॥

मंत्रं ते मंत्रालयधामन् भुवि जप्तुः
पातुः पादांभो लघु नश्यत्यतिदुःखम् ।
स्वामिन् भूमन् भो गुरुराज प्रतिकूलं
दारापत्याद्यं सकलं कुर्वनुकूलम् ॥ ८ ॥

चक्रेऽष्टश्लोकीमवधूतः कविकृष्णः
तत्पाठेन त्वं भव तुष्टो हर कष्टम् ।
स्वामिन् भूमन् भो गुरुराज प्रतिकूलं
दारापत्याद्यं सकलं कुर्वनुकूलम् ॥ ९ ॥

॥ इति श्रीमत कृष्णावधूतपंडितकृतौ श्रीमद्राघवेंद्रतंत्रे प्रत्यक्षसिद्धिप्रदे दशस्तोत्रपटले प्रतिकूलस्वानुकूलीकरणस्तोत्रं नाम सप्तमोध्यायः ॥